**Journal of Interdisciplinary and Multidisciplinary Research (JIMR)**
E-ISSN:1936-6264| Impact Factor: 8.886| UGC CARE II
Vol. 19 Issue 04, April- 2024
Available online at: https://www.jimrjournal.com/
(An open access scholarly, peer-reviewed, interdisciplinary, monthly, and fully refereed journal.)

# प्रत्ययः स्वरूपं सन्धारणं विवेचनञ्च

**डॉ. हेमन्तकृष्ण** शर्मा

'प्रत्ययः' इति शब्दः प्र उपसर्गपूर्वकं 'इण् गतौ' इत्यस्माद्धातोः अचि प्रत्यये कृते प्रकृतव्युत्पत्तिः भवति, यस्य शाब्दिकार्थः भवति यः अग्रे अथवा पृष्ठे सरति इति, अर्थात् यः अनुसरतीति 1 । संस्कृतवाङ्मये अस्य अनेके अर्थाः सन्ति, यथा- धारणा, विश्वासः, अनुभवः, सञ्ज्ञानम्, कारणम्, आधारः, क्रियायाः साधनम्, प्रसिद्धिः इत्यादयः । व्याकरणस्य क्षेत्रे प्रत्ययर्नाम नियमितव्यापकचिह्नविशेषस्य नाम भवति यस्य योगः मूलशब्दस्य अन्ते भवति । तथा च यः शब्दस्य रूपनिर्धारणाय प्रयुक्तः भवति । शब्दानां शिष्टतायाः निर्धारणं प्रत्ययैः एव क्रियते । शब्दानां शिष्टतायाः साधुतायाः वा अभिज्ञा प्रत्ययैः सम्भवति । प्रत्ययस्य स्थितिः सार्वत्रिकं भवितुमर्हति, किञ्च तेषां विविधस्थितीनां स्पष्टाभिज्ञानाय तान् परवर्ती एव मन्यन्ते । **'परश्च स भवति धातोर्वा प्रातिपदिकाद्वायः प्रत्ययसञ्ज्ञः'** 2 ।

प्रत्ययः मूलतः अर्थे विद्यमानस्य भेदस्य अन्तरस्य वा ज्ञापकः सङ्केतको वा भवति । प्रत्ययं सम्बन्धतत्त्वम् अपि वक्तुं शक्यते । प्रातिशाख्यानां समीक्षणैः इदं ज्ञायते यत् अस्मै परवर्तीशब्दाय ध्वन्यै वा प्रयुक्तः भवति । प्रातिशाख्यैः अस्य तथ्यस्य पुष्टिः सम्प्रत्ययश्च भवति यत् अयं शब्दः आदिप्रत्ययाय, मध्यप्रत्ययाय तथा चान्तप्रत्ययाय व्यवहृतं भवति । निरुक्ते अयं शब्दविचारः तथा सन्धारणाद्यर्थेषु प्रयुक्तः भवति । अर्थप्रत्ययस्य प्रयोगः अर्थविनिश्चयस्य अर्थे निरुक्ततः प्राप्यते । प्रत्ययाय **'अन्तःकरणम्'** तथा **'उपबन्धः'** इत्यनयोः शब्दयोः प्रयोगः निरुक्ततः प्राप्यते । महाभाष्ये प्रत्ययस्य व्युत्पत्यात्मकार्थः इत्थं प्रकारेण भवति- **'यः तमर्थं सम्प्रत्यायति स प्रत्ययः'** । यः अर्थस्य प्रत्यायनं कारयति, अथवा यस्य अर्थः प्रकृतितः ज्ञायते तं 'प्रत्ययः' इति उच्यते । **'प्रत्येति (प्रत्यायति) अर्थमिति प्रत्ययः अथवा यस्यार्थः प्रकृत्या प्रत्यायते रणोऽपि प्रत्ययः'** । सुप्-सनादि-लडादि-विकरण-कृत्तद्धिताः प्रत्ययसञ्ज्ञकाः । प्रकृतेः परे भवन्तीति परिभाषिताः' 3।

आधुनिकभाषाशास्त्रीणाम् अभिमतं वर्तते यत् प्रत्ययानां विकासः स्वतन्त्रशब्दैः भूतवान् अस्ति । एते स्वतन्त्रशब्दाः 'अव्ययाः' आसन्, सम्बन्धतत्त्वं प्रकटीकरणाय शब्दस्य आदौ अन्ते वा एतेषां विनियोगः क्रियते । कालविपर्ययात् एतेषां रूपं सङ्कुचितम् अभवत् तथा च एते विभिन्नेषु

अर्थेषु सम्पृक्ताः भवन्ति । अत्र इदम् अवधेयः अस्ति यत् स्वतन्त्रशब्दैः प्रत्ययानां विकासः अभवत्- अस्याः धारणायाः सम्पुष्टिः आदिमभाषाणां सूक्ष्मसमीक्षणैः भवति । आदिमजातीनां भाषायां मूर्तवस्तूनाम् अभिज्ञापकशब्दानां सत्ता अभविष्यत्, अमूर्तभावानां नैव ।

विश्वस्य भाषाणां समीक्षणेन इदं ज्ञायते यत् प्रत्ययाः आदौ, मध्ये अन्ते च प्रयुक्ताः भवन्ति । संस्कृते तथा भारोपीयभाषासु अन्त्यप्रत्ययानां प्रधानता प्राप्यते । अत्र इदं ध्यातव्यं वर्तते यत् विश्वस्य यासु भाषासु आदौ मध्ये वा प्रत्ययानां प्राधान्यं वर्तते, तासु अन्त्यप्रत्ययानां प्रयोगः नैव विद्यते । संस्कृतस्य उपसर्गम् आदिप्रत्ययरूपेण स्वीकर्तुं शक्यते न वेति ? इति अत्र विचारणीयः अस्ति । अर्थविशेषकस्य रूपेण उपसर्गाणां योगः सदा क्रियया सह आदौ भवति 4। उपसर्गाद् धात्वर्थे परिवर्तनं भवति । उपसर्गसंयोगेन धात्वर्थे सबलताविशिष्टतान्यूनतादीनां विभिन्नस्थितीनां सम्भावना भवति । प्रत्ययानां प्रयोगः अपि अर्थे यत्किञ्चित् परिवर्तनं नीतुं भवति, तत्परिवर्तनम् उपसर्गपरिवर्तनस्य अपेक्षया भिन्नं वर्तते । प्रत्ययानां स्थितिः आदौ, मध्ये अन्ते च भवति । किन्तु प्रत्येकम् आदिप्रत्ययम् उपसर्गवद् एव नैव स्वीकर्तुं शक्यते । इदम् अपि स्मरणीयं वर्तते यत् उपसर्गाणां योगः आदौ क्रियया सह एव भवति । एतद् एव कारणं वर्तते पाणिनिः प्र, परा, अप, समादीन् उपसर्गरूपेण तथा च बहुजादीन् प्रत्ययरूपेण स्वीक्रियते । प्र, परा, अपादीन् पूर्वस्थिवर्णध्वनीन् प्रत्ययसदृशं निर्णीतार्थे भूते अपि पूर्वविद्यमाने मूलार्थे यत्किञ्चित् संशोधकरूपेण स्वीक्रियते । मूलार्थे एवं विधस्य संशोधनस्य क्षमता प्रत्यये नैव मन्यते । प्रत्ययेषु अधिकार्थतायाः क्षमता स्वीकृतम् अस्ति । मूलार्थे उपसर्गयोगस्य कारणं यः संशोधनं भवति, तद् अपि कश्चित् निश्चितस्य प्रवृत्तेः न भवति, अर्थात् तस्य किञ्चित् नियतस्वरूपं नैव भवति । किन्तु मूलार्थस्य (धातोः) सम्बद्धत्वात् तथा अन्यत्र योगस्य अविद्यमानतायाः परिणामस्वरूपतया एतेषां प्रत्ययादीनाम् अपेक्षया या विशिष्टता अधिगता भवति, तस्य कारणम् एव तान् निपातेभ्यः सर्वथा पृथक् वर्णस्य रूपेण समाम्नातकरणम् अपरिहार्यः आसीत् । संस्कृतव्याकरणे स्थितेः वैशिष्ट्यत्वात् एव एतेषां प्रत्ययानां निपातानां वा श्रेण्यां विन्यस्तं नैव कृत्वा उपसर्गसञ्ज्ञा दीयते ।

संस्कृतस्य स्य, सिच्, चङादीन् मध्यप्रत्ययरूपेण स्वीकर्तुं शक्यते । येषां स्थितिः अ, य, उ, इत्यादिभिः मध्यागमैः सर्वथा भिन्नं वर्तते । किञ्च संस्कृतव्याकरणे मध्यप्रत्ययस्य आगमरूपेण विकरणस्य रूपेण ग्रहणं क्रियते । प्रत्ययस्य सम्बन्धे एवंविधस्थितिः पाणिनेः 'परश्च' 5 इति सूत्रेण

सह सम्बद्धः भवति । किञ्च एतस्यां स्थितौ अपि प्रत्ययस्य योगः मूलधातोः अनन्तरम् एव भवति । मूलतः भिन्नता एवमेव वर्तते यत् एतेषां प्रत्ययानाम् अनन्तरम् अपि सुप्तिङ्प्रत्ययानां योगः भवति । यत्र इदम् अवधेयो वर्तते यत् सुप्तिङ्प्रत्ययानां गणना पाणिनिः सामान्यप्रत्ययानाम् अन्तर्गतम् एव करोति । अतः एतेषां प्रत्ययानां परिचर्चा यदि त्यजेत् तर्हि यान् वयं मध्यप्रत्ययानां रूपेण स्वीकरोति, यथार्थतः पाणिनेः 'परश्च' इति नियमस्यान्तर्गतम् एव दृष्टिगताः भवन्ति । आगममानां स्थितिः सर्वथा भिन्ना दृष्टिगता भवति । आगमनां द्वौ वर्गौ लक्षितौ भवतः । प्रथमवर्गे ते आगमाः आगच्छन्ति, येषां योगः प्रत्ययस्य लक्ष्यपूर्तये भवति । यथा- संस्कृतस्य अ, आ इत्यादयः । एते आगमाः मूलतः भूतकालिकक्रियायाः प्रत्यायका भवन्ति । धातुभिन्नार्थस्य संसूचकत्वात् एतान् प्रत्ययरूपेण एव स्वीकरणम् एव समीचीनं भवति । पाणिनिना अत्यन्तसूक्ष्मदृष्ट्या सामान्यनियमस्य अनुकरणं कृतम् अस्ति तथा च तान् 'आगमः' कथ्यते । यस्मिन् आधारे प्रत्ययस्य स्थितिः परवर्ती एव सिद्ध्यति । द्वितीयवर्गानुसारेण आगमस्य स्थितिः निश्चयतः मध्ये अन्ते वा भवति । मध्यागमे सामान्यतया संयुक्ताक्षरेषु एव भवति अथवा यत्किञ्चित् रूपभेदं (यथा-आदत्, आसीत् इत्येतेषु) नीत्वा अर्थान्तरनिर्देशाय प्रयोगः पुरस्सृतः भवति ।

पाणिनिः स्ववैज्ञानिकदृष्ट्या प्रत्ययान् परवर्ती स्वीकरोति, किन्तु ते मध्यवर्तीप्रत्ययानाम् अस्तित्वम् अपि स्वीकृत्य प्रतीयन्ते । सुप्तिङौ परित्यज्य तेषाम् एतादृशानां शताधिकानां प्रत्ययानां समाम्नातः कुर्वन्ति । याः पदस्य प्रयुक्तरूपेण मध्यवर्ती एव परिलक्षिताः भवन्ति । यथार्थसत्यं तु इदं वर्तते यत् पाणिन्याचार्याः अस्मिन् प्रकरणे तेषां प्रत्ययानां परिगणना नैव कुर्वन्ति, यान् सुप्तिङयोः रूपेण विभक्तिप्रत्ययस्य अभिधानं दीयते । येषां परिगणनं अपराध्याये कुर्वन्ति । अपरं यान् वयं 'विकरणः' 6 इति नामतः जानन्ति, यथा-शप्-श्यन्-श्नु-श-श्नम्-उ-श्ना-यक्-आमादीन् पाणिनिः प्रत्ययरूपेण ग्रहणं करोति 7 । तस्मिन् धारणायां सार्वधातुकार्धातुकानाम् अपि भेदोऽपि प्रत्ययाश्रयी वर्तते । तथा च एते भेदाः अपि कस्याचित् सम्बद्धधारणायाः परिणानस्वरूपम् एव वर्तन्ते । पाणिनिः तिङः गणना प्रत्यये नैव करोति । यथार्थतः तेषां दृष्टौ ते आदेशमात्राः एव भवन्ति 8 । सुपः सन्दर्भे स्पष्टतः प्रतिपादयति यत् तेषां योगः प्रातिपदिकस्त्रीप्रत्ययान्तस्थितेर्वा उपलब्धत्वात् एव भवति 9। सत्यं तु इदं वर्तते यत् येषां गणना ते प्रत्ययशीर्षकान्तर्गते कुर्वन्ति, तेषाम् आगमनं विनियोगः अस्य

सुपः आगमनात् पूर्वमेव भवति । ते सर्वे प्रत्ययाः प्रातिपदिकस्य क्रियारूपस्य वा रचनायाः मूलाधारं प्रस्तुतं कुर्वन्ति । उदाहरणार्थम्- कृत्-तद्धित-सनादिक-सार्वधातुक-आर्धधातुकादयः प्रत्ययाः ।

विवेचनाधारेण निश्शङ्करूपेण कथ्यते यत् सुप्तिङ्संयोगेन शब्दस्य मूलार्थे कश्चिद् भेदः नैव आगच्छति । इमौ साधनान्तर्गतं, कारकान्तर्गतं पुरुषान्तर्गतं वा स्वीक्रियते । मूलतः सुप्तिङ्प्रत्यययोः उद्देश्यः क्रियाकर्तादिषु सम्बन्धज्ञापनमेव वर्तते । निष्कर्षतः इमौ अन्यप्रत्ययैः सर्वथा भिन्नरूपेण परिचयार्थं 'अन्त' इत्यभिधानं क्रियते । अस्मिन् सन्दर्भे इदम् अवधार्यं वर्तते यत् कृत्तद्धितसनादिसार्वधातुकार्धातुकादीनां प्रत्ययानां योगः सुप्तिङ्प्रत्यययोः पूर्वमेव वर्तते । तथा च इमौ धातुप्रातिपदिकयोः स्वरूपे विभक्तिप्रत्यययोः योगेन पूर्वमेव स्वसंस्काराः प्रवेशं कारयति । अस्मिन् विषये स्पष्टतः प्रतिपादनं कुर्वन् कथयति यत् प्रातिपदिकः धातुः वा सुप्तिङ्प्रत्यययोः आगमनेन पूर्वं तद्भिन्नं केनचिद् अन्यप्रत्ययेन (कृत्तद्धितादिभिः) संयुक्तः भूवन् 10, तदा तेषाम् इमानि परिवर्तितानि रूपाणि पुनः 'प्रातिपदिकम्' अथवा 'धातुः' इति सञ्ज्ञा भविष्यति11, यतो हि विभक्तिप्रत्यययोः कार्यं तासां मूलस्थितीनाम् अनन्तरमेव सिद्ध्यति 12।

1. प्रत्येत्यनेनेति प्रत्यायति वेति व्युत्पत्तौ इण् गतौ २.२४ एरच् (पा०सू० ३.३.५६) इति सूत्रेणाचि (प्रति+इण्+अच्) प्रत्यय इति सिद्ध्यति । प्रत्ययः=ज्ञानम् । प्रत्यय इति महती सञ्ज्ञा क्रियते ……… । तत्र महत्याः सञ्ज्ञायाः करण एतत् प्रयोजनमन्वर्थसञ्ज्ञा यथा विज्ञायेत प्रत्यायतीति प्रत्ययः (अष्टा० ३.३.१ उपरि महाभाष्यम्)
2. अष्टाध्यायी ३.१.२ उपरि काशिकायाः वचनम् ।
3. सुपद्मव्याकरणम् । प्रतीयते येनार्थः स प्रत्ययः इति रुढिः ।
4. 'उपसर्गाः क्रियायोगे । (अष्टा० १.४.५९, क्रियाविशेषक उपसर्गः (अष्टा० १.३.१-७)
5. अष्टाध्यायी ३.१.२
6. 'प्रकृतिप्रत्ययमध्यपतितत्वं विकरणत्वम्' (का०व्या०वि० पृ. १८५)

7. अष्टा० ३.१.६७-८४ पर्यन्तं सूत्राणि प्रत्ययविधायकानि सन्ति ।
8. लस्य (अष्टा० ३.४.७७) तथा 'तिप्तस्०' (अष्टा० ३.४.७८) प्रथमाधिकारसूत्रं वर्तते, येन आदेशस्य विधानं भवति ।
9. 'ङ्याप्प्रातिपदिकात्' (अष्टा० ४.१.१)
10. अष्टाध्यायी ३.१.३१
11. अष्टाध्यायी ३.१.३२ तथा च १.२.४६
12. अष्टाध्यायी ४.१.१